M. T. B. COLLEGE, SURAT
Manuscripts Library

No. Ref. /
Ser. 572

Title: Vedanta Tatva Sar

372

वेदांत तत्व सारः

Vedānta Tatva Sāra	Title
Rāmānujāchārya	Author
	Editor
	Year, Vols.
	Publisher
372	Remarks

गंधर्ववाक्यं मुक्ताहारं मर्कटाय गर्दभाय सुभोजनं गानं कर्णकं नानीय मनुष्याय मदात्मजो॰ ब्रह्मविद्या च पापाय नास्ति कायशिवार्चनं यथा॰
दानमपात्राय तथा तस्मै मदात्मजो। रूपणाः वधिनः सर्वपशुपरनीत्ततादयः समाश्रयेक्षयं यांति तत्र दुःखं विद्यते॥ त्रिविधा कर्मरचना संचिता प्रथमा
स्मृता। प्रारब्धा देहसंगस्था क्रियमाण तृतीयका। मध्यतश्चैषतमं लोके तदानात्माप्नुयान्नरः अनादाविह संसारे दुर्वारे मकरध्वजे। कुले च कानि नीम्
के सहृदि प्रदर्दूष्परः अग्निहोत्रं भवभक्तं देवीहोमं भवंतथा। महारुद्रादिहोमाश्च यौवनं रति घ्रपुष्पदं विद्या नश्यति लोभेन नश्यनं दानविवर्जितं राजादु
र्मंत्रिणा नश्येत् संगान्नश्यति वै यतिः पुत्रस्तुलालनान्नूनं कुपुत्रेण कुलं तथा। खलोपासनयाद्वीलं दानं चैव कुपात्रतः बकक्षारतया शाकं क्षीरं तक्रसमा॰
गमात् पत्नी चप्रोषितेबाला नश्यत्येव न संशयः नश्यतिश्रीस्तथाऽन्यायात् धर्मो नश्यति निंदया सर्वं नश्यति गर्वेण क्षात्रं युद्धपलायनात् शालिग्रामस्य पूजा
ते घस्यपद्ये विनश्यतः ज्ञानं नश्यति मोहेन विना विद्यां च वाडवः नष्टं रूपं तथा कांते तव कुष्टेन संशयः शिवे प्रसन्ने सति किं न कुर्यो मोक्षोपि हरेन शिव
स्तेव शिवप्रसादतः तपांचमेकं करोति रंकं नृपमस्मदादि

वे॰प्र॰ श्रीमते रामानुजाय नमः सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयं ब्रह्मेत्यत्र द्वितीयशब्देन सजातीयादि भेदशून्यं गीकारे कथं तादृशस्य जगदाकारः मायांगी
१ कारेणेति चेत् किं तदानीं निर्विशेषं ज्ञानमात्रस्वरूपं ब्रह्म मायामिति प्रतीति जानाति न वा जानाति चेत् ज्ञानमात्रस्य कथं ज्ञातृत्वं न जानाति चेत् अज्ञानाद्
धर्मं गीकरोति अपि च यत् किंचिद्धर्मस्येयं मायांगीकारानंतरमभ्युपेयते भवद्भिस्तत्सर्वं मायांगीकारानुगुणशास्त्राभ्युपगमे निर्विशेषत्वहानिः किंच तदानीं
किं मायाविलक्षणं ब्रह्म उत वैलक्षण्येन मायात्मकं यदि विलक्षणं वस्तुतः परिच्छेदादनंतं ब्रह्मलक्षणं न स्यात् अथ मायात्मकं तदंगीकारवचनं निरर्थकं
सत्यं ज्ञानमनंतं ब्रह्मेति लक्षणवाक्यमपि तत् अपार्थं स्यात् सजातीयविजातीयस्वगतभेदरहितलक्षणं तदन्यानिरूपितनिरुपधर्मबोधोपि नान्यथा ननु शिष्यो
पदेशार्थं अध्यारोपापवादन्यायेनेदमुच्यते अतत्स्वभावायां रज्जौ सर्पारोपवत् वस्तुन्यवस्त्वारोपोऽध्यारोपः वस्तु सच्चिदानंदाद्वयं ब्रह्म अज्ञानादि सकलज
डसमूहः अवस्तु अज्ञानं तु सदसद्भ्यामनिर्वचनीयं त्रिगुणात्मकं ज्ञानविरोधि भावरूपं यत्किंचिदेवं वदंति अहमज्ञ इत्यनुभवात् अन्यथा निर्विशेषस्य कथं कारण
त्वमिति चेत् तर्हि एवं जगन्मिथ्यात्ववादिशिष्याचार्ययोः तदुपदिष्टज्ञानस्य [illegible] तदंतर्गतत्वात् शिष्योपदेशार्थं कल्पितमपि [illegible] कल्पिताचार्योपदिष्टेन
कल्पितज्ञानेन कल्पितस्य शिष्यस्य कल्पितावार्थसिद्धिः निर्विशेषचिन्मात्रातिरिक्तं सर्वं मिथ्येति वदतो मोक्षार्थश्रवणादिप्रयत्नो निष्फलः अविद्याकार्यत्वात् शुक्तिका
रजतादिषु रजतग्रहणोपादानादिप्रयत्नवत् [illegible] ज्ञानं न बंधनिवर्तकं अविद्याकल्पितवाक्यजन्यत्वात् स्वप्नमविद्यात्मकत्वात् अविद्या १
कल्पितज्ञानाश्रयत्वात् कल्पिताचार्याय न श्रवणजन्यत्वात् स्वाप्नबंधनिवर्तकवाक्यजन्यज्ञानवत् नन्वेवमार्यतत्त्वज्ञानयोः कल्पितत्वेपि स्वप्नदर्शि
तु भयेन प्रबोधवत् ज्ञानोत्पत्तिसंभव इति चेन्नैवं दृष्टांते परमार्थदोषस्य स्वस्वप्नस्य सिंहरूपसदर्थावलंबित्वात् [illegible] कारणत्वं ज्ञानस्य भयं प्रति
भयस्य प्रबोधं प्रति प्रबुद्धोपि देवदत्तः परमार्थः दार्ष्टांते तु सर्वस्य मिथ्यात्वेन दृष्टांतानुपपत्तिः अपि चास्मिन् सिद्धांते नारायणः परं ब्रह्म आत्मा नारायणः

परः इत्यादिश्रुतिप्रतिपादितो नारायणः प्रथमं गुरुः [illegible] कल्पितः पूर्णब्रह्मसनातनः पुरुषोत्तमः अर्जुनेन कल्पितः कल्पिता च तदुपदिष्टा सर्वशास्त्रमयी गीता
इत्येवं दुःसिद्धांतापत्तिदोषः प्रज्ञामानिभिः कथं न विचारणीयः अपि चैतत्सिद्धांतनिष्ठे [illegible] स्वस्य गुरुविषयमाया कल्पितं इत्येवं वक्तव्यं गुरुरेव परं
ब्रह्म गुरुरेव परा गतिः स हि विद्यातस्तं जनयति तच्छ्रेष्ठं जन्म तस्मै न द्रुह्येत कदाचन आचार्यं मां विजानीयात् इत्यादिश्रुतिस्मृतिविरोधः कथं न पराम
र्शनीयः नन्वज्ञानदशायां उपदेशादयः सत्या एव जाते तु ज्ञाने यत्र त्वस्य सर्वमात्मैवाभूत् तत्केन कं पश्येत् इत्यादिश्रुतेर्न द्वैतदर्शनमिति चेत् तर्हि अद्वितीयात्म
साक्षात्कारादूर्ध्वं न द्वैतं ज्ञानं तत्कार्यं च कथं द्वैतदर्शनपूर्वकउपदेशादिपरत्वं व्यवहारः बाधितानुवृत्त्या इति चेत् सम्यक् ज्ञानप्रहाणे वेदार्था बाधितानुवृत्तिरिति
सिद्धांतिनो [illegible] इति चेत् ज्ञानं नातु तद्ज्ञानं मिथ्यादिभ्रमाजातिविरोधः अनुभवविरोधश्च रज्जुसाक्षात्कारदशायां सर्पभूतभ्रमानुपलंभात् न तिष्ठ
तीति चेत् उपदेशसमये सम्यक् ज्ञानप्रवृत्तित्वेन बाधितानुवृत्त्यसंभवात् कथं द्वैतदर्शनं तत्कृतोपदेशाः अथवा विज्ञवितो मोहमहांधकारोत्थ आश्रितो मैतव
संनिधानात् विष्णावसोः किं न समीपगम्य रीतितमोभिः प्रभवं सरजाधि इति वादिनः उद्धवस्य स्वतत्त्वज्ञानस्फूर्तिप्रकाशनवेलायां बाधितानुवृत्त्यसंभ
वे नमोस्तु ते महायोगिन् प्रपन्नमनुशाधि मां यथा त्वच्चरणांभोजे रतिः स्यादनपायिनी इति भेददर्शनमूलविज्ञापनं कथं संभवति रज्जुसाक्षात्कारम
दशायां सर्पभानानुपपत्तिवत् उपदेश्यज्ञानतत्त्वज्ञानानुसंधानेन अद्वितीयसाक्षात्कारे सति बाधितानुवृत्त्यनुपपत्त्या उपदेशानुपपत्तिस्तदवस्था तथा च भगव
दुपदिष्टतत्त्वज्ञानावधारणानंतरं नष्टो मोहः स्मृतिर्लब्ध्वा त्वत्प्रसादान्मया तत्त्वसाक्षात्कारादिविष्कारदशायां बाधितानुवृत्त्यसंभवात् त्वत्प्रसादात् स्थितोस्मि गतसंदेहः दु
र्योधनादिकं प्रति युद्धविषयं तव वचनं करिष्य इति द्वैतदर्शनमूलं अर्जुनवाक्यं कथं संगच्छते किंच परमार्थदोषमूलके रज्जुसर्पादिदृष्टांते अपरमार्थदो
षमूलेषु बाधितानुवृत्तिः इत्याद्यपि यत् कथंचिदुच्यते तत् [illegible] आद्यं ज्ञानं [illegible] रूपदेशादिभिरधिगतज्ञानत्वे तेषामेव संभवति
ईश्वरत्वात् यः सर्वज्ञः सर्ववित् स्वाभाविकी ज्ञानबलक्रिया च [illegible] युगपत्सर्वं [illegible] सदा स्वतः इत्यादिश्रुतिविरोधात् कथं [illegible] न श
क्यते कथं तर्हि तस्य द्वैतदर्शने उपदेशादिव्यवहारश्चेति निरूपणीयं ननु मिथ्याभूतस्य मिथ्यात्वेन दर्शनं न सम्यक् ज्ञानविरोधीति चेत्

वे.सा. यदीश्वरः मिथ्यात्वेनैव स्वव्यतिरिक्तं जानाति तर्हि तन्निग्रहानुग्रहादिषु प्रवर्तते न ह्युन्मत्तः मिथ्यात्वेन ज्ञात्वा अनुदिश्य किमपि करोति किं चेश्वरस्यापि बुद्धिशेष
विशिष्टत्वेन स्वरूपावभासेऽपि विकल्पितेऽपि तद्दर्शनं मिथ्यात्वेनापि न संभवति नहि शुक्तित्वेन शुक्तौ भासमानायां तत्र रजतावभासापत्तिः तथानभ्युपगमे
२ सर्वज्ञः सर्ववित् यस्य ज्ञानमयं तपः इत्यादिश्रुतेः गुणी सर्वविद्यः तेषामेवानुकम्पार्थमहमज्ञानजं तम इति स्मृतिविरोधश्च यथा पद्मकस्तद्ज्ञानान्नि सिद्धिचन्द्रदर्शन
मविद्येव तथैवास्य तमिथ्यात्वेनापि द्वैतदर्शनमविद्यैव दोषं विनापि न संभवति दोषाभ्युपगमेऽपि शुद्धमहाविभूत्याख्ये परे ब्रह्मणि कथ्यते नैतद्युक्तं च यद्वा सर्वकारण
कारणे समस्तहेयरहिते विद्याख्ये परमे पदे परः पराणां सकला न यत्र क्लेशादयः सन्ति परावरेशे इत्यादिनिर्दोषप्रतिपादकशास्त्रविरोधः तस्मादाधाततिमिरादि
दोषरहितस्य द्विचन्द्रादिदर्शनं मिथ्यात्वेनापि न भवति तथा समस्तहेयप्रत्यनीकस्य ईश्वरस्यापि मिथ्यात्वेनापि न संभवति द्वैतदर्शनं किंच नीलपृष्ठाद्याकारेणानु
भूयमानायां शुक्तौ मिथ्यात्वेनापि न रजतप्रतीतिः तदुपादानाद्यधिष्ठानानुमतानां यदि दृश्येत तदा ईश्वरस्यापि सर्वदाऽपरोक्षिपाद्वयानन्दा
रमिथ्यात्वेन द्वैतदर्शनं तन्मूलोपदेशादिव्यवहाराश्चोपपद्येरन् किंच रज्जौ सर्पवत् निर्विशेषे चिन्मात्रे ब्रह्मणि आरोपितस्य प्रपञ्चस्य नाज्ञातोऽति
द्वैततिरोहितः सर्वव्यवहारः ज्ञानमात्रस्वरूपस्य कथं दृष्टं कथं वाज्ञानमन्तरेण भ्रमितस्य प्रपञ्चस्य दृष्टा मायायोगेनेति चेत् किमयं योगः अथवा संबन्ध
आगन्तुकः उत स्वाभाविकः आगन्तुके तु विभुत्वं ब्रह्मणो न स्यात् स्वाभाविकत्वे तु अत्रापि मायाशबलमेव ब्रह्म अतश्च सर्वदा विशिष्टमेवेति सिद्धम् एवंच स
ति कथं विजातीयशक्त्या सबलत्वमिति प्रपञ्चप्रतीतिः किं कारणं ईक्षणाभावात् प्रतीतिरिति चेत् तदभावे किं कारणं इदं वेति चेत् किमग्रे पीठावत् ब्रह्म तर्हि सर्वदास २
विशेषमेवेति सिद्धं किंचांगीकरणात् पूर्वं कमाश्रिता माया ब्रह्माश्रितेति चेत् सर्वदा वैशिष्ट्यप्रसङ्गः अद्वैतहानिश्च ननु मायायाः अपरमार्थत्वात् नो
क्तदोषप्रसङ्ग इति चेत् अपरमार्थशब्देन किं विवक्षितं रज्जुसर्पवत् मिथ्यात्वं अथ विकारवत्त्वेन ब्रह्मसमानसत्ताकत्वं नचाद्यः अज्ञानत्वेन
भासकज्ञाननिवर्त्यभावरूपमिति सिद्धसंप्रदायवचनविरोधः अथ मयाध्यक्षेण प्रसूयते सचराचरमित्युक्तया कार्योत्पत्तिः कारणाभावे न स्यात् असतः
कति

परोक्षत्वस्य व्रीहिशक्तिमत्त्वरूपकार्यकालासंभवात् ननु कार्यस्याप्यसत्त्वे नैष दोषः स्वाप्नशिरश्छेदनकार्यमपि स्वाप्नचोरस्य कारणत्वं दृश्यते इति चेन्न
वैधर्म्याच्च न स्वप्नादिवत् इति सूत्रे स्वप्नजागरितयोः वैधर्म्यात् जागरितप्रत्ययानां स्वप्नप्रत्ययवत् बाधप्रतिषेधात् तथा सत्त्वाबाधात् परमस्येति सत्त्व
यावत्कारणमस्य त्रिषु कालेषु सत्त्वं न व्यभिचरति तथा कार्यमपि जगत् त्रिषु कालेषु सत्त्वं न व्यभिचरतीति कार्यस्य सत्त्वप्रतिपादनात् अन्यथा असत्समवायित्वे तेन
गादादुरनिर्वचः इत्यादिरपि प्रसङ्गात् गोत्वाच्चयवती सा अजनयित्री विकारजननीमक्षामपूर्वां भूमिमापीन लोकवायुरिति अजा ध्रुवा अस्मान्मायी सृजते
विश्वमेतत् अजामेकां लोहितशुक्लकृष्णां बह्वीः प्रजाः सृजमानां सरूपाः अजो ह्येको जुषमाणोऽनुशेते जहात्येनां भुक्तभोगामजोऽन्यः मायां तु प्रकृतिं विद्यान्मायिनं
तु महेश्वरम् यस्यावयवभूतैस्तु व्याप्तं सर्वमिदं जगत् क्षरात्सरतः परः मम योनिर्महद्ब्रह्म मम माया दुरत्यया प्रकृतिं पुरुषं चैव विद्ध्यनादी उभावपि इत्यादि
श्रुतिस्मृतिविरोधाच्च नहि मिथ्याभूतं वस्तु अक्षरमव्ययादिभिः पदैरुपदिश्यते द्वितीयस्तु पक्षः प्रकृतेः ब्रह्मसमानसत्ताकत्वाभ्युपगमाद्
विकारजननीमक्षामजामिति विकारित्वादिभिश्च स्वविकारत्वेन सततपरिणामित्वेन ब्रह्मस्वरूपाभावात् न ब्रह्मसमानसत्ताकत्वं अतएवेयमनन्तादिपदैरुपर्यय
ते तत्कार्यत्वेनापि अनित्यत्वेनाविर्भावतिरोभावधर्मकत्वसाम्यात् स्वप्नप्रपञ्चमृगतोयादिवत् सामिथ्यात्वादिपदैरुपचारतः व्यपदिश्यते वैराग्यजन
नार्थं यच्चोपलभ्यमानमनवस्थितमविनाशित्वम् सदसदनिर्वचनीयत्वेन कार्यस्य न भावत्वमिति सदसतउपलब्धिविनाशयोगेनाभिमतमिथ्यात्वसाध
यति किं त्वनित्यत्वं यद्देशकालविशेषोपलभ्यते नोपलभ्यते च तेषामनित्यत्वं प्रवदन्ते: अनादिः परमार्थश्च प्राकृतं त्वभ्युपगम्यते तत्
नाश्रित्य न संदेहः नाशेऽभ्युपपादिते यत्तु कालांतरेणापि नान्यसंज्ञामुपैति वै परिणामादिसंभूतानां तद्वस्तु नृप तच्च किं देहः
अविनाशित्वतः प्रथितः आत्मवस्तुकोऽपि तेषु नानाभूतेषु आगमापायिनोऽनित्याः अनित्यमसुखं लोकं इमं प्राप्य सहस्रेण तु सुमहीतेन निगमेनात्मनात्मवित् आत्मानं वे
दसत् इत्येता निःसङ्गो विचरेदिह तदेतदक्षयं नित्यं जगत् तदप्यनित्यमित्यनेन असतो विद्यते सत्त्वसत्तायाः व्यपदेश इति अन्यथा पूर्वापरविरोधः प्रस-

आदिविरोधश्च प्रपञ्चः सद्भावग्राहक इतिसूत्रकारोप्याह नाभाव उपलब्धेः न नेव कूमेवाद्वितीयं ब्रह्मेति श्रुतिः स्फुटतया द्वितीयसं ब्रह्मणोय
वेदां दानिकथं तर्हि वस्त्वंतरसद्भावे तद्विशिष्टत्वं ब्रूते वस्त्वंतरविशिष्टस्यैवाद्वितीयत्वं श्रुत्यभिप्रायः तथाहि इदं विश्वात्मिके नामरूपबहुलायतनं जगदग्रे सदेव प्राक्
२ एकमेवाविभक्त नामरूपकल्पया एकत्वावस्थापन्नमेव अद्वितीयं अधिष्ठानं तत्रशून्यंच सदेवासीदित्यर्थः एकमेवाद्वितीयमित्यादिभिरैकार्थ्यात् सव
द्वैविशेष्यानुपपत्तिः नपरमात्मनैव न्यंकोपि कारणविषयसामर्थ्यात् कारणोपाधिक गुणाविशिष्टप्रकृतिकालशरीरकपरमात्मा न तु परस्थापयति तथा
अत्रसदेवेत्येवकारेण वकुस्यामितिसृज्यमाना कार्यबहुत्वाद्व्युदस्यते सर्वासां कारणवादिनीनां श्रुतीनामेकवाक्यतावश्यकत्वात् तथाहि
त्तियासीद्धुरिवनिष्ठकुः एको ह वै नारायण आसीन्न ब्रह्मा नेशानो नेमे द्यावापृथिवी न नक्षत्राणि नापो नाग्निर्न सोमो न सूर्यः स एकाकी न रमेत
शान्तिं स्य ध्यानान्तःस्थस्यैका कन्या दशेन्द्रियाणि [illegible] किं तदासीत्तस्मै [illegible] नाम आसीत् एक मनाधार इमाः प्रजाः प्रजायन्ते दिव्यो देवः
एको नारायण इत्याद्यनुसारात् तद्धेदं तर्ह्यव्याकृतं विस्तारशून्यं आसीत् नामरूपाभ्यां व्याक्रियतेति नामरूपव्याकरणमात्रश्रवणाच्च अप्यवेवकेऽप्यर्थः
अन्यथा परस्परव्याघातप्रसंगात् उपादिष्टं चैतत् साभिप्रायं भगवता एकादशे एको नारायणो देवः पूर्वसृष्टं स्वमायया संहृत्य कालकलया कल्पां
तेन कल्पान्ते ईश्वरः एक एवाद्वितीयोऽभूत् आत्माधारोऽखिलाश्रयः कालेनात्मानुभावेन साम्यं नीतासु शक्तिषु सत्त्वादिष्वादिपुरुषः प्रधानपुरुषेश्वरः परा
वराणां परमः आस्ते कैवल्यसंज्ञितः इत्यादिना सलेवाद्वितीयत्व निर्दिशन्ति विशिष्टस्यैवाद्वितीयत्वं स्फुटतया सिद्धं तदाहेच मय्येव सकलं जा
तं मयि सर्वं प्रतिष्ठितं मयि सर्वं लयं याति तद्ब्रह्माद्वयमस्म्यहं श्वेताश्वतरोपनिषदि च मंत्राभिमानिभिः देवैरपि सूक्ष्मचिदचिद्विशिष्टस्यैव पर २
मात्मनः परमकारणत्वं निर्णीतं ॐ ब्रह्मवादिनो वदन्ति किं कारणं ब्रह्म कुतः स्म जाता जीवाम केन क्व च संप्रतिष्ठाः अधिष्ठिताः केन सुखेतरे
षु वर्तामहे ब्रह्मविदो व्यवस्थां कालः स्वभावो नियतिर्यदृच्छा भूतानि योनिः पुरुष इति चिन्त्या संयोग एषां न त्वात्मभावादात्माप्यनीशः सुखदुःखहेतोः २

ते ध्यानयोगानुगता अपश्यन् देवात्मशक्तिं स्वगुणैर्निगूढां यः कारणानि निखिलानि तानि कालात्मयुक्तान्यधितिष्ठत्येकः वेदान्तसूत्रकारोपि
त्वयोगमाहात्म्यादिदमेव निश्चितमित्याह श्रीभागवते भक्तियोगेन मनसि सम्यक् प्रणिहितेऽमले अपश्यत्पुरुषं पूर्वं मायां च तदपाश्रयां यया सं
मोहितो जीव आत्मानं त्रिगुणात्मकं परोऽपि मनुतेऽनर्थं तत्कृतं चाभिपद्यते अनर्थोपशमं साक्षाद्भक्तियोगमधोक्षजे लोकस्याजानतो व्यासश्चक्रे सा
त्वतसंहितां किंच अग्रे इत्येतेन यदि प्रलयकालो विवक्षितः तदा तु अक्षरं तमसि लीयते तमः परे देव एकीभवति प्रकृतिर्या मया ख्याता व्यक्ताव्यक्त
स्वरूपिणी पुरुषश्चाप्युभावेतौ लीयेते परमात्मनि परमात्मा च सर्वेषामाधारः पुरुषोत्तमः स विष्णुनामा वेदेषु वेदान्तेषु च गीयते भागवतेच ब्रह्मादि
पुत्रलीनेषु नष्टेको वै चराचरे आत्मस्थं [illegible] प्रकृतेस्तम इति एक आसीत् आत्मा वै प्रभुः इत्यादिनेकप्रमाणैस्तदानीं सूक्ष्मचिद
चिद्विशिष्टत्वं ब्रह्मणः सिद्धत्वात् विशिष्टस्याद्वितीयत्वं सिद्धं यदा तु यत्पूर्वं कदाचिदपि न सदाचिदपि सद्भाव तत्कालेऽपि शब्दार्थः तदा तु सूर्याचन्द्रमसौ धा
ता यथापूर्वमकल्पयदित्यादिश्रुत्यभिप्रायं अथ च तदानीं जीवानां तत्तत्कर्मप्रवाहानां चाभावात् देवादि विषमसृष्टेः किं कारणमिति निरूपणीयं इष्य
ते चेत् केनचित् साधुकारी साधुर्भवतीत्यादिश्रुतिविरोधात् वैषम्यनैर्घृण्यदोषप्रसंगात् ननु प्रपञ्चस्य मिथ्यात्वेन न वैषम्यादिदोषप्रसंगात् इति चेन्नैवं
अयं मिथ्यात्ववादः प्रयोजनाभावात् तु तन्नेत्यादिश्रुतिविरोधः दोषपरिहारार्थं वैषम्यनैर्घृण्ये न सापेक्षत्वात् इति सूत्रनिर्माणवैयर्थ्यं
च स्याच्चैवं ननु सत्यो नाध्यस्तप्रपंचस्य कः द्रष्टा ब्रह्मैवानाद्यविद्यातिरोहितस्वरूपं स्वगतनानात्वं पश्यतीति चेन्न नित्यमुक्त अखण्डैकरसः
प्रकाशैकज्ञानमात्रस्वरूपस्य स्वनिरंकुशस्य तिरोधानासंभवात् प्रकाशपर्यायस्य ज्ञानस्य तिरोधाने स्वरूपनाशप्रसंगः तिरोधानं नाम वस्तुस्वरूपविद्य
मानत्वेऽपि प्रकाशानिवृत्तिः प्रकाश एव वस्तुरूपं मिथ्यांगीकारे तिरोधानाभावः स्वरूपनाशो वा स्यात् न च वस्तुस्वरूपप्रकाशस्य नित्यत्वेऽपि तद्विशिष्टमात्र
मविद्यातिरोहितमिति वैशिष्ट्यस्य स्वरूपातिरिक्तत्वे प्रागुक्तदोषस्य तादवस्थ्यात् अतिरिक्तत्वे च सविशेषत्वप्रसंगात् न च निर्विशेषप्रकाशमा
त्रस्य ज्ञानसाक्षित्वमहंकारादि जगद्भ्रमश्चोपपद्यते साक्षित्वस्य मायाविशिष्ट ज्ञानविशेषगतत्वात् ज्ञानमात्रगतः किंच यदि ब्रह्मैवानाद्य

वे॰त विद्यावशात् स्वगतनानात्वं पश्यति नहि प्रलयकाले विषमानेष्यज्ञानेपि प्रपंचादर्शने किं कारणं किंच ब्रह्मज्ञानपक्षे स्वाज्ञाननिवृत्तौ तस्यैव मोक्षमानत्वात् तदविद्याव
च्छिन्नानां जीवानां मोक्षार्थं श्रवणादिप्रयत्नो निष्फलः अविद्याकार्यत्वात् स्वाप्नमुमुक्षोः प्रयत्नवत् शुक्तिरजतादिषु रजताद्युपादानादिप्रयत्नवत् मोक्षार्थश्च
४ यत्नोपि व्यर्थः कल्पिताचार्यजन्यज्ञानकार्यत्वात् शुकवत् [illegible] वामदेवादिप्रयत्नवत् किंच एकमेव ब्रह्म सर्वशरीरेषु जीवमनुभवति चेत् पादे मे वेदना शिरसि मे सुखमितिवत्
सर्वशरीरेषु सुखदुःखप्रतिसंधानं स्यात् जीवेश्वरबहुत्वे [illegible] शिष्याचार्यहर्तृहृतादिव्यवस्था च न स्यात् सोभरिप्रभृतिषु योगिकृतानेकशरीरप्रयुक्तसुखदुःखादिसंधा
नमेकस्य दृश्यते न चाहमर्थस्य ज्ञातृत्वान्तद्भेदे प्रतिसंधानाभावे नात्मभेदादिति वाच्यं आत्माज्ञानेव सत्वाहमर्थस्य अंतःकरणाभासत्वेनाकारो जडत्वात् प्रति+
तु कारणत्वात् शरीरेंद्रियादिवन्न ज्ञानविकारजनकोऽस्मदेतदेवेति नहि विकृता विकृतो विपरीततालोपावि [illegible] नान्योतोस्ति द्रष्टेति ज्ञानात्मैवास्य रूपः विकृतात्म
रैकेन विज्ञाता [illegible] मोक्षधर्मेच अव्यक्तमानो प्रकृतिं बुध्यते पंचविंशकः न तु बुध्यति गं सर्व प्रकृतिः पंचविंशकं किंच अन्यत्र सत एवान्यत्रारोपनियमात् न च विद्यमाना
देवि स्वरूपेणासतः प्रपंचस्य न ब्रह्मण्यारोपसंभवः दृश्यते हि रज्ज्वादिषु सत एव सर्पादेरारोपः नीलं नभ इत्यत्रापि पूर्वमनुभूतस्य सत एव नीलस्य प्रतीतिः
स्वप्नेपि अन्यजन्मनि जन्मांतरे वा दृष्टस्य कस्यचिद्विषयस्यानुभवः अदृष्टात् [illegible] भावना उपजायते इति काशीरामवचनात् नन्वारोपः स्वविषयस्य
क्वचित्प्रतीतिमात्रमपेक्षते न सत्यत्वमपि इति चेन्न प्रतीतिरप्यसतः शशशृंगादेरिवासंभवात् नन्वसज्जन्यसर्पप्रतीतेरिव प्रपंचप्रतीतेरपि दोषमात्रमेवका
रणमस्तु नियमपि इति विषयसत्त्वं नापेक्षितमिति चेन्न दोषरूपकारणस्यापि मिथ्यात्वेन पक्षे विषयप्रतीतिरूपकार्यस्यानेरसंभवात् कार्यस्य कारणास
नापेक्षितत्वनियमात् नन्वसतो प्यारोपितसर्पस्य भयादिकार्यं प्रति कारणत्वदर्शनात् कार्यस्य कारणसत्तानपेक्षितत्वनियमो नास्तीति चेन्न अप्रतः परोक्ष
सन्तु [illegible] शक्तिमह [illegible] कारणत्वासंभवात् भ्रमस्थले व्यारोपितत्वाद्धि विषयज्ञानस्यैव भयादिकार्यहेतुत्वेन विषयस्य तद्धेतुत्वाभावात् कणमात्रमपि ४
व्याहृतपक्षे कार्यत्वनिवर्तित्वानुपपत्तेः नन्वसतोपि सर्पादेः ज्ञानकारणत्वेनोपपत्तिवत् भयकारणत्वोपपत्तिरपि किं नस्यादिति चेन्न दोषस्यैवासद्दर्शनकारणत्वा
रणत्वेन पातेन भ्रमस्थले विषयस्य ज्ञानकारणत्वानुपपत्तेः ननु घटपटादीनां व्यावहारिकसत्त्वमंगीकृतमेवेति चेन्न स्वरूपतो मिथ्यात्वे तस्य शुक्तिरजतस्य व्यव
हारार्थहासंभवात् नन्वसतोपि स्वाप्नपदार्थस्य कालावच्छिन्नव्यवहारोपयोगित्वं दृश्यत इति चेन्न हि प्रातिभासिकव्यावहारिकसांकर्यप्रसंगः किंच

रज्जौ अध्यस्तानां सर्पभूच्छिद्राम्बुधारादीनां मसत्त्वे यदि किमपि भेदो वक्तुं शक्यते तदा सन्मात्रे अध्यस्तानामपि अयं व्यावहारिकसत्ताकः अयं
च प्रातिभासिकसत्ताकः इत्येवं भेद उच्येत। अवच्छेदवादे यथा वृक्षाणां समष्ट्यभिप्रायेण वनमित्येकत्वव्यपदेशः तथा नानात्वेन प्रतिभासमा
नानां जीवगतानामज्ञानानां समष्ट्यभिप्रायेण तदेकत्वव्यपदेशः इयं समष्टिरुत्कृष्टोपाधितया विशुद्धसत्त्वप्रधाना एतदुपहितं चैतन्यं सर्वेश्वरत्व
सर्वेश्वरत्व सर्वनियंतृत्वादिगुणकं अंतर्यामी जगत्कारणमीश्वर इति व्यपदिश्यते सकलाज्ञानावभासकत्वात् यः सर्वज्ञः सर्ववित् अस्येयं समष्टिर
खिलकारणत्वात् कारणशरीरमानंदप्रचुरत्वात् कोशवदाच्छादकत्वाच्च आनंदमयकोशः सर्वोपरमत्वात् सुषुप्तिः अत एव स्थूलसूक्ष्मप्रपंचलयस्थानं
इति चोच्यते यथा वनस्य व्यष्ट्यभिप्रायेण वृक्षा इत्यनेकत्वव्यपदेशः तथाज्ञानस्य व्यष्ट्यभिप्रायेण तदनेकत्वव्यपदेशः इंद्रो मायाभिः पुरुरूप
ईयते इयं व्यष्टिर्निकृष्टोपाधितया मलिनसत्त्वप्रधाना एतदुपहितं चैतन्यं अल्पज्ञत्वानीश्वरत्वादिगुणकं प्राज्ञ इत्युच्यते एकाज्ञानावभासकत्वात् अनयोः समष्टिव्यष्ट्योः
वनवृक्षयोरिवाभेदः एतदुपहितयोरीश्वरप्राज्ञयोरपि वनवृक्षावच्छिन्नाकाशयोरिवाभेदः वनतदवच्छिन्नाकाशयोरपि आधाराधारानुपहिताकाशवत् अ
नयोरज्ञानतदुपहितचैतन्ययोराधारभूतं तदनुपहितं चैतन्यं तत्तुरीयमिति चोच्यते शिवमद्वैतं चतुर्थं मन्यते इति श्रुतेः इदमेव तत्तुरीयं शुद्धचैतन्यमज्ञा
नादितदुपहितचैतन्याभ्यामविविक्तं सत् महावाक्यस्य वाच्यं विविक्तं सत् लक्ष्यमिति चोच्यते इति यदुक्तं तदयुक्तं ईश्वरस्याधारभूतानुपहित
चैतन्यमिति वचनं मूलमनाधारं दिव्यो देव एको नारायण इत्यात्माधारो निराश्रय इत्यादिश्रुतिविरुद्धत्वात् वृक्षाणां समूहरूपस्य वनस्य दृष्टान्तत्वाननंतरसंता
केशेन वनस्थानीयस्येश्वरस्यापि जीवसंतानान्तरसंतानकल्पादादौ एकत्वेनावस्थानं पश्चात् एकोहं बहु स्याम् अनेन जीवेनानुप्रविश्य नामरूपे व्याकरवाणीति संकल्प
पूर्वकं बहुभवनं जीवभावापत्तिश्च न संभवति ननु समष्टिपूर्वत्वात् व्यष्टीनां संभव इति चेन्न व्यष्टीनां समूहावस्था एव समष्टिरिति व्यवह्रियते सेनावन
राश्यादिषु तथा दृष्टेः किंच समष्ट्यवस्थायां जीवास्तिष्ठन्ति न वा तिष्ठन्ति चेज्जीवभावापत्तिसंकल्पवैयर्थ्यं तदवस्थानं नातिष्ठन्ति पक्षेपि न कथंचिदुप
पद्यते न जायते म्रियते वा विपश्चित् इत्यादिना ऽजत्वादिश्रुतेः जीवानां प्राचीनकर्मफलभोगाय जगत्सृष्ट्यभ्युपगमाच्च अन्यथा विषमत्वाद्यनु

परोक्षं तथा च सत्यं वैषम्यनैर्घृण्ये न सापेक्षितत्वात् सृज्यमानदेवादिक्षेत्रज्ञकर्म सापेक्षत्वाद्विषमसृष्टेः देवादीनां देवादियोगं तत्तत्कर्म सापेक्षं दर्शयति श्रु
वे.त तिः साधुकारी साधुर्भवति पापकारी पापो भवति पुण्यः पुण्येन कर्मणा भवति पापः पापेन कर्मणा न कर्माविभागादिति चेन्नानादित्वादित्युपपद्यते चाप्युपल
५ भ्यते च प्राक् सृष्टेः क्षेत्रज्ञा न संति कुतः अविभाग श्रवणात् सदेव सोम्येदमग्र आसीदिति अतः तदानीं तदभावात् तत्कर्म न विद्यते कथं तदपेक्षं सृष्टिवै
षम्य वैषम्यमित्युच्यते इति चेन्न अनादित्वात् क्षेत्रज्ञानां तत्तत्कर्मप्रवाहाणां तु तदनादित्वेप्यविभागमुपपद्यते च यत स्वरूपेत्यप्यस्तु तदानीं परिसत्त्व
नामरूपं प्राप्तं शरीरं तथापि पृथक् व्यपदेशानर्हं अतिसूक्ष्मं तथानभ्युपगमे अकृताभ्यागमकृतविप्रणाशप्रसंगश्चोपलभ्यते च तेषामनादित्वं नता
यते म्रियते वा विपश्चिदिति सूर्याचन्द्रमसौ धाता यथापूर्वमकल्पयदित्यादौ तर्हि इदं तर्हि अव्याकृतमासीत्तन्नामरूपाभ्यां व्याक्रिय
तइति नामरूपव्याकरणमात्रश्रवणात् क्षेत्रज्ञानां स्वरूपानादित्वं सिद्धं स्मृतावपि प्रकृतिं पुरुषं चैव विद्ध्यनादी उभावपीति सर्वधर्मानिरूपणप्रकृति
यांतिमामिकां ननु घटे भिन्ने यथाकाश आकाशः स्याद्यथापुरा एवं देहमृतो जीवो ब्रह्मसंपद्यते पुनः इत्यादिना घटाकाशदृष्टांतेन ब्रह्मणा जीवभा
वापत्तिः गम्यते इति चेन्न आकाशदृष्टांते तद्भाविताशभेदपूर्वको घटाकाशन्यायेन पूर्वपूर्वोपाहितापरिगतेत तत्र दशत्व तस्य भोक्तृत्वात् जीवो नाम
परिततिरोनापूर्वभोगपूर्ववासनाकुंभे तत्रोपप्रतिसंधानानुपपत्तेः उपकृतभ्यमान क्षेत्रज्ञपूर्वोनुभूतभोगप्रतिसंधानविरहेः भोक्तृत्वं तस्य कृतानि मनुष्याण
प्रतिसंधानेनोपात मतेन मनुकुलेन स्थिरा तथापि स्वगप्रसंगात् स्थिता तु परमेव अकृता भ्यागमकृतविप्रणाशप्रसंगश्च मोक्षानुपपत्तिश्च तथाहि स्थिरा
तमनि उपाधीनां सर्वदा सर्वत्र गमनागमनेन विनश्वरोपाधिप्रदेशोपि उपाधिनतेरसंचारस्यावर्जनीयत्वात् उपाधेरेव मोक्षः न तु आत्मनः श्रुतेर्कार्थस्तु यथाकाशमुपाध्युमे
ताव कालाकाश आकाशः घटाकाशपावस्थायां अल्पावकाशप्रदतेन वर्तमानघटदोषासु स्वच्छो वर्तते घटे भिन्ने तु यथापुराकाशः स्यात् महावकाशप्रदः स्वच्छ
तथात्वभावतः सत्यसंकल्पत्वगुणकः अयं संसारिजीवः संसारदशायां अल्पज्ञोनीशः तथापि जन्ममरणादिधर्मैर्वर्जितो वर्तते देहमृते सकलसूक्ष्मोपाधिविनि
र्मुक्तो पुनर्ब्रह्मसंपद्यते च दि स्वं संपद्याविर्भावः स्वेन शब्दादि साधनसमादविर्भूत गुणाष्टकः सत्यत्वादि गुणविशिष्टो भवति ब्रह्मणः स्मृतिमानम वाप्नोति स्यानं
त्वादिकं स्यते ननु अनेन जीवेनात्मना नुप्रविश्य नामरूपे व्याकरवाणि सोऽदिशि ब्रह्मण एव जीवभावापत्तिः श्रूयते तत्रेदं विमर्शनीयं संकल्पपूर्वक जीवभा

वापत्तिः किं निर्विशेषस्य उत मायोपाधिकस्येश्वरस्य न चाद्यः निर्विशेषस्य संकल्पशक्त्यभावात् नाद्वितीयः विशुद्धसत्त्वप्रधानोपाधिकस्य मलिनसत्त्वोपाधिस्या
मिति संकल्पो मिथ्यात्वमतेन खलु भवतः स्वस्यानर्थं संकल्पयति संकल्पयितृत्वाच स्वोपाधि परित्यागेनान्यथाभवने यदीश्वरः तर्हि निर्विशेष एवाकिं न स्यात् न
चविघोपाधिविशिष्टस्यैवाविद्योपाधिकत्वं संभवति विद्याविद्ययोः सांकर्यप्रसंगात् किंच अंतःप्रविष्टः शास्ता जनानां सर्वात्मा इत्यनेन स्वस्य स्वयमेव तस्य
शास्तृत्वं अनुपपन्नं तदृत्तीति विरुद्धं अनुपपन्नः अपिच एष एव साधुकर्म कारयति तं यमधो निनीषतीति सर्वज्ञोपि जीवभावापन्नस्य स्वस्य नरकानुभवहेतु
भूतासाधुकर्म कारयिता पापकर्मसु निवर्तयिता न कोपि नियंतेति सर्वमसंभवमेव स्यात् किंच मुक्तिर्हि नाम यथापूर्वं स्वरूपेणावस्थानमिति मुमुक्षुणा
ऽऽरण यदवस्थापन्नस्य संकल्पपूर्वकं जीवभावापत्तिः पुनः तदवस्थावाप्तिरेव तस्य मोक्षः तर्हि ईश्वरस्य जीवभावापत्तौ पुनः ईश्वरत्वापत्तिरेव मोक्षः तथा सति नि
र्गुणमोक्षवादो न संगच्छते तथा च सूत्रं इतरव्यपदेशाद्धिताकरणादिदोषप्रसक्तिः जगतो ब्रह्मानन्यत्वं प्रतिपादयन्निद्रो तत्त्वमस्ययमात्मा ब्रह्मेत्यादिभिर्जी
वस्यापि ब्रह्मानन्यत्वं व्यपदिश्यत इत्युक्तं तत्रेदं चोद्यते यदि तस्य जीवब्रह्मणोरभावो ऽमीभिर्वाक्यैर्व्यपदिश्यते तदा ब्रह्मणः सर्वज्ञत्व सत्यसंकल्पादि युक्तस्यात्मनो
हितरूपजगदकरणं अहितरूपजगत्करणं इत्यादि दोषाः प्रसज्येरन् आध्यात्मिकादिदुःखाकरं तदुःखाकरं चेदं जगत् नचेदृशे स्वानर्थे स्वाधीनो
बुद्धिमान् प्रवर्त्तते जीवाद्ब्रह्मणो भेदवादिन्यश्च श्रुतयः जगद्ब्रह्मणोरनन्यत्वं वदता त्वयैव परित्यक्ताः भेदे सत्यनन्यत्वासिद्धेः औपाधिकभेदविषया भेदश्रुत
यः स्वाभाविकाभेदविषयाश्चाभेदश्रुतयः इति चेत्तत्रेदं वक्तव्यं स्वभावतः स्वस्मादभिन्नं जीवं किं जगत्कारणं ब्रह्म जानाति नवा न जानातीति चेत्सर्व
ज्ञत्वहानिः जानाति चेत् स्वस्मादभिन्नस्य जीवस्य दुःखं स्वदुःखमिति जानतो ब्रह्मणो हिताकरणाहितकरणादि दोषप्रसक्तिरनिवार्य्या ननु मायाभा
सेन जीवं सोकरोति इति जीवेश्वरयोः ब्रह्मप्रतिबिंबत्वं श्रूयते अतो बुद्धिप्रतिबिंबितो जीवः मायाभासईश्वरपदेस्थितः निर्विशेष उपलक्षितमात्रस्य
ब्रह्मणः प्रतिबिंबत्वमिति श्रूयते चेन्न श्रुतिविरुद्धत्वात् सकारणं करणाधिपाधिपः न चास्य कश्चिज्जनिता न चाधिपः न जायते म्रियते वा विपश्चिदिति
नित्यानां जीवानां करणकलेवरप्रदानश्रवणविरोधोपि तथाच वेदस्तुतौ बुद्धींद्रियमनःप्राणान् जनानामसृजत्प्रभुः मात्रार्थं च भवार्थं च आत्म
नेकल्पनाय च सर्वथैवतु माया आभासेन अयथार्थेन जीवेश्वरौ करोति उभयोरन्तरे वैपरीत्यं तन्मते दृश्यते हि इत्युक्तेति उक्तार्थे आभासमयेषु

हेत्वाभासः धर्माभासः किंतु हेतुपरिहारं उच्यते अतो नित्यः शाश्वतोऽयं आत्माप्यनीश अनीशया शोचति मुह्यमानः इत्यादयो जीवतत्त्वे देहात्मभ्रमस्य स्वतंत्रात्मभ्रमं चोत्पादय
वे॰त ति तेन देहोऽहं इत्यादिकमभिमानीति विकृतोऽभवति तथा माति विश्वस्योत्तमेश्वरः ॐ शास्त्रं तत्र ब्रह्मश्रुते मीमांसा तत्र नातिदिव आत्माधर्मो विवक्षाः अयः इत्युक्ते ईश्वरतत्त्वं कुर्वन्त
६ न्याधारत्वमायोपाधिकत्वबुद्धिं जनयन्ति तथा च गीयते अव्यक्तं व्यक्तिमापन्नं अवजानन्ति परं भावमजानन्तो नन्वौपाधिकः प्रतिबिंबितार्थे अपि सिद्धः सएवाभ्यंगीकृ
मीः इं तत्तर्हि असदेवेदमग्र आसीत् पीरित विभ्रमः शून्यः इत्यत्र असदुक्त्या शब्दान्तरपां असिद्धत्वेन वाक्यमेवतत्तमिति तिर्विक्रान्ते कुतो नांगीक्रियते तदनंगीकारे यत्तत्प्र
शेष॰ यंत्रापि समानं नन्वयं जीवः यदि भिन्नः तर्हि कथं तत्त्वमस्यादि वाक्यैरैकत्वव्यपदेशः इत्यत्र अंशो नाना व्यपदेशादन्यथा चापि दासकितवादित्वमधीयत एके ब्रह्मदाशा
जीवः कुतः नानाव्यपदेशात् अन्यथा चैकत्वेन व्यपदेशात् उभयथा हि व्यपदेशो दृश्यते नानाव्यपदेशस्तावत् स्रष्टृत्व स्रष्टव्यत्व नियन्तृत्व नियम्यत्व सर्वज्ञत्वाज्ञत्व स्वाधी
नत्वपराधीनत्व शुद्धत्वाशुद्धत्व कल्याणगुणाकरत्व विपरीतत्व पतित्वशेषित्वादिभिर्दृश्यते अन्यथा ऽभेदेन व्यपदेशोऽपि तत्त्वमस्ययमात्मा ब्रह्मेत्यादिभिर्दृश्यते अपिदा
सकितवादित्वमप्यधीयते एके ब्रह्मदाशाः ब्रह्मदासाः ब्रह्मेमे कितवाः इत्याथर्वणिकाः ब्रह्मणो दासकितवत्वादिव्यपदेशमध्यधीयते तत्र जीवव्यापित्वेनाभेदव्यप
दिशन्तीत्यर्थः एवमुभयव्यपदेशमुख्यत्वसिद्ध्यै जीवोऽयं ब्रह्मणोंऽश इत्यभ्युपगन्तव्यः न च भेदव्यपदेशानां प्रत्यक्षादिप्रसिद्धार्थत्वेनान्यथासिद्धत्वं ब्रह्मस्रष्टृत्व तन्नियम्य
त्वतच्छरीरत्वतदाधारत्वतत्साम्यतत्संहार्यत्वतदुपासकत्वतत्साध्यधर्मार्थकाममोक्षरूपपुरुषार्थभोक्तृत्वादयः तत्र जीवब्रह्मणो
र्भेदः प्रत्यक्षाद्यगोचरत्वेनान्यथासिद्धः अतो जगत्स्रष्टृत्वादिवादिनीनां प्रमाणान्तराप्रसिद्धभेदानुवादेन सिद्धस्यकथनेन मिथ्यार्थोपदेशपरत्वं अपि समर्पित्वं ६
ममैवांशो जीवलोके जीवभूतः सनातनः मद्विभूतिभूतो मदंश एव स्वभावतः सम्यक् कल्याणगुणावः सकाशादनादिकर्मरूपाविद्यावेष्टनात्तिरोहितस्वस्वरूपो जी
वभूतः इति संकोचितज्ञानैश्वर्योजीवलोके संसारे वर्तमानः तथा च श्रुतिः तदिमे सत्याः कामाः अनृतापिधानाः जीवानां कर्मप्रवाहानादित्वेन कर्मविभा
गादितिचेन्न अनादित्वादुपपद्यते चाप्युपलभ्यते च इति सूत्रादपि ऋते स्मृतिश्च अनादिकालप्रसुप्तः संसारपदवीं गतः नैवेश्वरस्यैकदेशवाची सर्वशब्दः जीवस्य
ब्रह्मैकदेशत्वे तत्कृतदोषा ब्रह्मणि भवेयुः न च ब्रह्मखण्ड जीवः इत्यसौ तत्रोपपत्तिः खण्डनत्वेन ब्रह्मणः खण्डत्वप्रसक्त्या अंशत्वादिकं नेवापरः तथैवांशो ब्रह्मणाव्यतीयाति
प्रकाशादिवज्जीवः परोऽस्य यथाग्न्यादित्यादेर्भास्वतो भारूपप्रकाशोंऽशो भवति यथा गवाश्वशुक्लकृष्णादीनां गोत्वादिविशिष्टानां गोत्वादिनि विशेषणा

न्यंशाः यथा वा देहिनो देवमनुष्यादेर्देहोंऽश इत्यादिवत् एकवस्त्वेकदेशत्वं ह्यंशत्वं विशिष्टस्यैकवस्तुनो विशेषणांशोऽयं विशेष्यांशोऽयमिति व्यपदिशन्ति विशेषणविशेष्ययो
रंशांशित्वेऽपि स्वभाववैलक्षण्यं दृश्यते एवं जीवपरयोर्विशेषणविशेष्ययोरंशांशित्वं स्वभावभेदश्चोपपद्यते तदिदमुच्यते नैवं परः इति यथा प्रकाशो न जीवस्तथा प्रकाशो
परः यथैवाग्नि प्रभावान् प्रभावान् न्यूथा भवति तथा प्रभास्थानीयादंशाज्जीवादंशित्वेन पर अर्थान्तरभूत इत्यर्थः एवं जीवपरयोर्विशेषणविशेष्ययोः स्वाभाववैल
क्षण्यमाश्रित्य भेदनिर्देशाः प्रवर्तन्ते अभेदनिर्देशास्तु पृथक्सिद्ध्यनर्हविशेषणानां विशेष्यपर्यन्तत्वमाश्रित्य मुख्यत्वेनोपपद्यन्ते तत्त्वमस्ययमात्मा ब्रह्मे
त्यादिषु तच्छब्दवत्त्वं शब्दवत् त्वमयमात्मेति शब्देऽपि जीवशरीरकब्रह्मवाचकत्वेनैकार्थाभिधायित्वात् ब्रह्मणः सामानाधिकरण्यं नेति नन्वस्य तदा संपन्नो भव
तिस्वमपीतो भवतीति जीवपरयोः स्वरूपैक्यं श्रूयते इति चेत् प्राज्ञेनात्मना संपरिष्वक्तो न बाह्यं किंचन वेद नान्तरमिति स्वापदशायां जीवस्य सर्वज्ञेन परमात्मना
निरस्तसमस्तभ्रमस्य बाह्याभ्यन्तरज्ञानलोपः श्रूयते नहि आकिंचिज्ज्ञत्वदशायामेव सर्वज्ञेन सता सैक्यं संभवति सता सोम्य तदा संपन्नो भवति अत्रापि न जीवपरयोः
स्वरूपैक्यं उच्यते अपितु सुषुप्तिकाले नामरूपानुसंधानाभावात् प्रलयकाल इव ब्रह्मणि लयः प्रतिपाद्यते स्वमपीतो भवति स्वात्मनि ब्रह्मणि
लीनो भवति ननु स्वात्मन्येव स्वस्य लयः संभवति अत्रापि सता सोम्य तदा संपन्नो भवतीति तृतीयासमासस्यात् संपत्तिशब्दस्य परिष्वङ्गार्थकत्वा
र्थान्तरत्वरूपैक्यासंभवः तथा च सूत्रकाराः सुषुप्त्युत्क्रान्त्योर्भेदेनेति अथ श्रुतिविवादो क्रियते ननु गुहां प्रविष्टावात्मानौ हि तत्पार्थे अनादिकाले जायात
यो ब्रह्मविदो वदन्ति त्रिणाचिकेता जीवस्य ब्रह्मप्रतिबिंबत्वं प्रतिपाद्यते इतिचेन्न एकदेशात्वाच्छिन्नत्वेक्ति तीयात्परमात्मनोरभावरूपावस्थयोः छायातप
यो इव अल्पत्वानल्पत्वशक्ति रूपस्वभावव्यवस्था मात्र प्रतिपादनपरत्वात् द्वा सुपर्णा ० कश्यति अश्नन्नन्योऽभिचाकशीति अत्रापि ब्रह्मणः आतप
त्वाभावादातपवज्ज्ञास्वरूपत्वमवान्तरशब्दार्थः इति जीवस्य छायाभावेऽपि छायावदुक्तदशायां तत्स्वरूपं छाया शब्दार्थो भवितुमर्हति ॥
अत एव कमनं ननु स्वभेदिष्यमविला हित मक्षायामिति छाया प्रतिबिंबवत् पाद्यं नाकाशे ब्रह्मप्रतिबिंबः ननु एक एवहि भूतात्मा भूते भूते व्यवस्थितः एकधा बहुधा चैव
दृश्यते जलचन्द्रवत् आकाशमेकं हि यथा घटादिषु पृथक् भवेत् तथात्मैको ह्यनेकस्थो जलधाराश्विवांशुमान् इत्यादिशास्त्रानुसारेण द्रागुक्तव्यकरणा
द्ब्रह्मप्रतिबिंबात्मनोऽसौ इत्यादि प्रतिबिंबात्मा तथैव माया हृदि मातद्विव्यमभियोग ब्रह्मछायानां इश्वरजीवइति मतानां भोपाधिकृत्सिद्धत्वं तत्रिष्व धनोयं ब्रह्माहमिति चेन्न

वे.

परिच्छिन्नव्योमादिविलक्षणवस्तुनः छायात्मेऽप्यसंभवात् अतोऽपि मृषाप्रत्यवणात् कल्पनीयकल्पनोऽसंभवादिकारे जीवेश्वरयोरपि मिथ्यात्वप्रसंगात् तदभ्युपगमे अप्रमाणो द्र
ष्टव्यः श्रोतव्यः यत्र हि दुरन्ततात्त्वेऽभवंतीत्यादि धीनां मानर्थक्यप्रसंगात् तस्यान्यस्य उपगमेऽप्रमाणेनामानांतरविषयत्वात् स्वानुभवस्यापि मिथ्याभूतत्वानतिरि
७ क्तो ... माय प्रमाणप्रमेयमिथ्यात्ववादिनः कथाप्रामाधिकारानुपपत्तेः ... द्रष्टीनोपदेशानां ... शरीरभूतचित् चिद्रूप तदोपाधि शब्द प्रतिपादनाय स्पर्श

[illegible]

६

वे. तिसंभवतीति वेदक्षिप्यं ब्रह्मणः प्राप्तिपदमतीति न विरोधः सतारयो न संतीशे यत्र च प्राकृता गुणा इति स्मृतेः ननु तत्र तथा रसं नित्यमव्ययं च यत् गंधरसादिनिषिध्य इत्युक्तं सर्वगंधः सर्व
८ रस इति याव कं धरस विधिः न चैकस्मिन् वस्तुनि गुणा तदभाव उपपद्यते वितितस्माद्धि ह्यमेद् वर्णितैर् नहि विरोधपरिहारः कार्यः सर्वकार्यत्वानि मनोमयत्वादिः एकं
क अशब्दत्वादिरिति चेत् विश्वमेवेदं पुरुषः तद्विश्वमुपजीवति पतिं विश्वस्यात्मेश्वरं शाश्वतं शिवमच्युतं यमंतः समुद्रे कवयो वयंति न तस्येशे कश्चन तस्य ना
म महद्यशः परात्परं यत् महतो महांतं न तत्समश्चाभ्यधिकश्च दृश्यते न तत्समो परो हि पुंडरीकाक्षात् न भूतो न भविष्यति वाराहे नारायणात्परो देवो न भूतो न भविष्यति ब्रा
ले नहि विष्णुसमा काचिद्गतिरन्याभिधीयते इत्येवं सततं वेदा गायंते नात्र संशयः श्वेताश्वतरे स विश्वकृद्विश्वविदात्मयोनिः ज्ञः कालकालो गुणी सर्वविद्यः प्रधानक्षे
त्रज्ञपतिर्गुणेशः संसारमोक्षस्थितिबंधहेतुः एको देवः सर्व० निर्गुणश्च सगुणो निर्गुणो विष्णुः ज्ञानगम्यो ह्यसौ स्मृतः अहितस्य गुणाः सर्वे सर्वे च निरवद्या अपि
वक्तुं शक्या वियुक्तस्य सत्वाद्यैरखिलैर्गुणैः एष आत्मा अपहतपाप्मा परास्य शक्तिर्विविधैव श्रूयते स ब्रह्म नारायणः परः इत्यादिश्रुतिस्मृतिभिः नारायणस्यैवाप्राकृ
त दिव्यकल्याणगुणयोगेन सगुणत्वं प्राकृतहेयगुणरहितत्वेन निर्गुणत्वमिति विषयभेदाभिधानेन एकस्यैवावगमात् ब्रह्मणो द्वैविध्यं दुर्वचनमिति दिक् इति श्रीरा
मानुजाचार्यविरचितं वेदांततत्त्वसारप्रकरणं संपूर्णं शुभमस्तु

372